# टिळक महाराष्ट्र विद्यापीठ, पुणे

**23E/22E**

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र ३ रे**

**विषयः मालविकाग्निमित्र** (23E431/22E432)

| **दिनांक :२१/०५/२०२५** | **गुण : १००** | **वेळ : दु. २.०० ते दु. ५.००** |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ पद्यानामनुवादं लिखत।** ३०

१. लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति।।

२. पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि।
बिन्दूत्क्षेपात्पिपासुः परिपतति शिखी भ्रान्तिमद्वारियन्त्रं सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः।।

३. आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे सन्दस्पर्शः करतल इव व्यापृतो माधवेन ।।

४. भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं सासूयमाननमितः परिवर्तयन्त्या।
कान्तापराधकुपितोष्वनया विनेतुः सन्दर्शितेव ललिताभिनयस्य शिक्षा।।

५. कान्तां विचिन्त्य सुलभेतरसम्प्रयोगां श्रुत्वा विदर्भपतिमानमितं बलैश्च।
धाराभिरातप इवाभिहतं सरोजं दुःखायते मम मनः सुखमश्नुते च।।

६. रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः प्रत्याख्यातविशेषक कुरबक श्यामावदातारुणम्।
आक्रान्ता तिलकक्रिया च तिलकैलग्नद्विरेफाञ्जनैः सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम्।।

७. वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम्।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम्।।

**प्र. २. टिप्पणीद्वयं सविस्तरं लिखत।** ३०

१. वसन्तसौन्दर्यम्।
२. विदूषकः।
३. अशोकदोहदम्।
४. सूत्रधारः।

**प्र. ३ ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत।** २४

१. चूताङ्कुरं विचिन्वत्योः पिपीलिकाभिर्दष्टम्।
२. ममाङ्गुलीयकमुद्रिकामदृष्ट्वा न मोक्तव्या।
३. मूढः परप्रत्ययनेयबुद्धिः।
४. यदा पुनर्मन्दमेधसः शिष्या उपदेशं मलिनयन्ति, तदाचार्यस्य न दोषः।
५. वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः।
६. प्राणाः कामिनां दूत्यधीनाः।

**प्र. ४ अ) रूपपरिचयं लिखत।** ५

मोक्तव्यः , प्रयतिष्ये, आचार्यौ, पूज्येन, द्रष्टुम्

**आ) सन्धिविग्रहं कुरुत।** ५

पूज्येनाहमादिष्टः, प्रतिवारितोऽस्मि, वाक्यादृते
अङ्गैरन्तर्निहित, समुद्रपल्वलयोरिवान्तरमिति

**इ) समासविग्रहं कुरुत।** ६

असंनिहिता, चित्रशाला, आकृतिविशेषेषु

----------